# B.M.S COLLEGE FOR WOMEN AUTONOMOUS

**BENGALURU – 560004**

**END SEMESTER EXAMINATION – SEPTEMBER / OCTOBER 2022**

**B.Sc - II Semester**

**LANGUAGE – SANSKRIT 1**

**Text: Vigraha of Hitopadesha, Grammar, translation and Comprehension**

**Course Code: BSC2AECSAM02** **QP Code: 2107**

**Duration: 2 ½ Hours** **Max. Marks: 60**

**Instructions: 1) Answer in Sanskrit / Kannada / English**
**2) Answer Q.Nos I, V and VII in Sanskrit only**

BMSCW LIBRARY

**I. समीचीनम् उत्तरं लिखत ।** **(1x10=10)**

**ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.**

**Select and write the correct answer.**

1. हितोपदेशस्य कर्ता कः?
   अ) नारायणः आ) कालिदासः इ) भासः ई) भारविः
2. हितोपदेशे कति उपायाः सन्ति ?
   अ) पञ्च आ) चत्वारः इ) त्रयः ई) षट्
3. हंसाः कैः वञ्चिताः ?
   अ) बकैः आ) मयूरैः इ) काकैः ई) उलूकैः
4. हिरण्यगर्भः कः ?
   अ) वायसः आ) बकः इ) मयूरः ई) राजहंसः
5. बकस्य नाम किम् ?
   अ) दीर्घमुखः आ) चित्रवर्णः इ) हिरण्यगर्भः ई) मेघवर्णः
6. विन्ध्यो नाम गिरिः कुत्र अस्ति ?
   अ) जम्बूद्वीपे आ) लंकाद्वीपे इ) नेपाले ई) जापाने
7. चित्रवर्णः कः ?
   अ) बकः आ) मयूरः इ) काकः ई) हंसः
8. केषाम् उपदेशः प्रकोपाय भवति ?
   अ) बालकानाम् आ) वानराणम् इ) मयूराणाम् ई) मूर्खाणाम्
9. वाग्दोषात् कः हतः ?
   अ) गर्दभः आ) मयूरः इ) वायसः ई) बकः
10. विलासो नाम रजकः कुत्रास्ति ?
    अ) काशीपुरे आ) हस्तिनापुरे इ) पाण्डवपुरे ई) सीतारामपुरे

**II** **द्वयोः प्रबन्धं लिखत ।** **(2x8=16)**

**ಎರಡಕ್ಕೆ ಪ್ರಬಂಧ ಬರೆಯಿರಿ.**

**Write an essay on any two of the following.**

अ) कथासाहित्यस्य उगम-विकासौ।
ಕಥಾಸಾಹಿತ್ಯದ ಉಗಮವಿಕಾಸಗಳನ್ನು ಕುರಿತು ಪ್ರಬಂಧ ಬರೆಯಿರಿ.
Write an essay on the growth and development of Kathasahitya.

आ) वानराणाम् उपदेशेन स्थानभ्रष्टाः खगाः।
ವಾನರರಿಗೆ ಮಾಡಿದ ಉಪದೇಶದಿಂದ ಸ್ಥಾನಭ್ರಷ್ಟರಾದ ಪಕ್ಷಿಗಳ ಕಥೆ.
The story of the birds which very evacuated due to the advice given by them to the monkeys.

इ) व्यपदेशेन शशानां कार्यसिद्धिः।
ವ್ಯಪದೇಶದಿಂದ ಮೊಲಗಳ ಕಾರ್ಯಸಿದ್ಧಿ.
Success of rabbits through popular representation.

**III.** **एकस्य अनुच्छेदस्य अनुवादं कुरुत ।** **(5x1=5)**

**ಯಾವುದಾದರೂ ಒಂದನ್ನು ಅನುವಾದಿಸಿ.**

**Translate any one of the passages.**

राजोवाच-दीर्घमुख! देशान्तरादागतोऽस्सि। वार्तां कथय। स ब्रूते- देव! अस्ति महती वार्ता। तामाख्यातुकाम एव सत्वरमागतोऽहम्। श्रूयताम्। अस्ति जम्बूद्वीपे विन्ध्यो नाम गिरिः। तत्र चित्रवर्णो नाम मयूरः पक्षिराजो निवसति। तस्यानुचरैश्चरद्भिः पक्षिभिरहं दग्धारण्यमध्ये चरन्नवलोकितः पृष्टश्च- कस्त्वम् ? कुतः समागतोऽसि ? तदा मयोक्तम्- कर्पूरद्वीपस्य राजचक्रवर्तिनो हिरण्यगर्भस्य राजहंसस्यानुचरोऽहम्। कौतुकाद्देशान्तरं द्रष्टुमागतोऽहम्।

अथवा / ಅಥವಾ / Or

अरे पाप दुष्ट बक अस्माकं भूमौ चरन्नस्माकं स्वामिनमधिक्षिपसि तन्न क्षन्तव्यमिदानीम्। इत्युक्त्वा ते सर्वे मां चञ्चुभिर्हत्वा सकोपा ऊचुः-पश्य रे मूर्ख स हंसस्तव राजा सर्वथा मृदुः। तस्य राज्येऽधिकार एव नास्ति। यत एकान्ततो मृदुः करतलगतमप्यर्थं रक्षितुमक्षमः। कथं स पृथिवीं शास्ति राज्यं वा तस्य किम् ?

**IV.** **वाक्यत्रयं ससन्दर्भं विवृणुत ।** **(3x3=9)**

**ಯಾವುದಾದರೂ ಮೂರು ವಾಕ್ಯಗಳನ್ನು ಸಸಂದರ್ಭ ವಿವರಿಸಿ.**

**Explain with reference to context any three of the following sentences.**

१. "वर्धमानाद्रक्षणं श्रेयस्तदभावे सदप्यसत्"।
२. "युष्मदीयः मयूरः केन राजा कृतः"।
३. "यदि दैवात्फलं नास्ति च्छाया केन निवार्यते"।
४. "भगवता चन्द्रेण भवदन्तिकं प्रेषितः"।

**V. संस्कृतभाषया उत्तराणि लिखत ।**

**अ) पञ्चानां सन्धिं विभज्य सन्धिनाम लिखत ।** **(5x1=5)**

१. तेनोक्तम् २. यस्यायम् ३. राजोवाच ४. वर्षास्वपि
५. अथैकदा ६. नैव ७. तत्रापि ८. इत्यभिधाय

BMSCW LIBRARY

**आ) चतुर्णां संस्कृतेन वाक्यानि रचयत ।** **(5x1=5)**

१. बहिः २. नमः ३. रोचते ४. अभितः

५. विना ६. भीतः ७. सह ८. अलम्

**VI . एतानि वाक्यानि कन्नडभाषायां वा आङ्गभाषायां वा अनुवदत।** **(1x5=5)**

१. वसन्तकाले कोकिलाः मधुरं कूजन्ति।

२. ग्रामं सर्वतः वृक्षाः सन्ति।

३. वृक्षेभ्यः पत्राणि अपतन्।

४. सर्वेषां देशेभक्तिः भवेत्।

५. कार्याणि उद्यमेन हि सिध्यन्ति न मनोरथैः।

**VII. परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत ।** **(1x5=5)**

रामायण-महाभारते द्वे ऐतिहासिके महाकाव्ये भारतीय संस्कृतिं प्रतिबिम्बयतः। रामायणस्य कर्ता वाल्मीकिः आदिकविरिति प्रथितो□ऽस्ति। रामायणे सप्त काण्डाः सन्ति। महाभारतं तु व्यासेन रचितमस्ति। अस्मिन् १८ पर्वाणि सन्ति। इदं 'पञ्चमवेदः' इति परिगणितमस्ति। 'महत्त्वात् भारवत्वाच्च महाभारतमुच्यते' इत्युक्तिः अस्य गरिमां बोधयति। लोकप्रिया भगवद्गीता महाभारते एवान्तर्गतास्ति।

**अधोलिखितप्रश्नानाम् उत्तरं संस्कृतभाषया लिखत ।**

१. ऐतिहासिके काव्ये के ?

२. रामायणे कति काण्डाः सन्ति ?

३. महाभारतं केन रचितम् ?

४. महाभारतस्य गरिमां का बोधयति ?

५. महाभारतान्तर्गता का ?

* * * * *

BMSCW LIBRARY